निर्घण्टः ॥ (हरीतकीशब्दे विवरणविशेषोऽस्याः ज्ञातव्यः ॥)

जीवनी, स्त्री, (जीवत्यनेनेति। जीव + करणे ल्युट् ङीप् च।) जीवन्ती। (पर्य्याया यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) काकोली। डोड़ी। मेदा। महामेदा। इति राजनिर्घण्टः ॥ यूथी। इति शब्दचन्द्रिका ॥

जीवनीयं, क्ली, (जीवतीऽनेन अस्माद्वा। जीव + करणे अपादाने वा अनीयर्।) जलम्। इति हेमचन्द्रः ॥ (जीवनप्रदे, त्रि। यथा, सुश्रुते। १। ४५।
"गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनम्।
जीवनीयं यथा वातपित्तघ्नं परमं स्मृतम् ॥")

जीवनीयगणः, पुं, (जीवनीयानामोषधीनां गणः।) औषधविशेषः। यथा, वैद्यकपरिभाषायाम्।
"अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकन्तथा।
जीवनीयगणः प्रोक्तो जीवनस्तु पुनस्तथा ॥"
("जीवन्ती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च।
ऋषभकजीवकमधुकं चेति गणो जीवनीयाख्यः ॥"
इति च वाभटे सूत्रस्थाने पञ्चदशेऽध्याये ॥)

जीवनीया, स्त्री, (जीवनीय + टाप्।) जीवन्ती। इत्यमरः। २। ४। १४२ ॥

जीवनेत्री, स्त्री, (जीवं नयतीति। जीव + नी + तृच् + ङीप् च।) सैंहली। इति राजनिर्घण्टः ॥

जीवनौषधं, क्ली, (जीवनस्य औषधं उपायविशेषः।) येन म्रियमाणो जीवति तदौषधम्। जीवरक्षाकारि। जीवनोपायः। तत्पर्य्यायः। जीवातुः २। इत्यमरः। २। ६। १२० ॥

जीवन्तः, पुं, (जीवयति जीवत्यनेन वा। जीव + "दृहिनन्दिजीविप्राणिभ्यः षिदाशिषि।" उणा। ३। १२७। इति झच्।) औषधम्। प्राणः। आयुर्व्विशिष्टे, त्रि। इत्युणादिकोषः ॥ जीवशाकः। इति राजनिर्घण्टः ॥

जीवन्तिकः, पुं, (जीवान्तकः। पृषोदरात् साधुः।) जीवान्तकः। इत्यमरटीकासारसुन्दरी ॥

जीवन्तिका, स्त्री, (जीवयतीति। जीव + झच् + कन् टाप् च। कापि अत इत्वम्।) वन्दा। वृक्षोपरिजातवृक्षः। गुडूची। जीवाख्यशाकः। इति मेदिनी। के, १६० ॥ जीवन्ती हरीतकी। इति राजनिर्घण्टः ॥

जीवन्ती, स्त्री, (जीवन्त + ङीष्।) लताविशेषः। जीवई इति जीयाती इति च भाषा। तत्पर्य्यायः। जीवनी २ जीवनीया ३ जीवा ४ मधुः ५। इत्यमरः। २। ४। १४२ ॥ जीवना ६ मधुस्रवा ७ स्रवा ८। इति तट्टीका ॥ पयस्विनी ९ जीवा १० जीवदा ११ जीवदात्री १२ शाकश्रेष्ठा १३ जीवभद्रा १४ भद्रा १५ मङ्गल्या १६ क्षुद्रजीवा १७ यशस्या १८ शृङ्गाटी १९ जीवदृष्टा २० काञ्जिका २१ शृङ्गशिम्बिका २२ सुपिङ्गला २३। इति राजनिर्घण्टः ॥ मधुश्वासा २४ जीवश्रेष्ठा २५ सुखङ्करी २६ शृङ्गराटिका २७ जीवपत्री २८ जीवपुष्पा २९। इति केचित् ॥ (यथा,—
"वरा शाकेषु जीवन्ती सर्षपाख्यवराः परम् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥) अस्या गुणाः। मधुरत्वम्। शीतत्वम्। रक्तपित्तवायुक्षयदाहज्वरनाशित्वम्। कफवीर्य्यविवर्द्धनत्वञ्च। इति राजनिर्घण्टः ॥ स्वादुत्वम्। स्निग्धत्वम्। त्रिदोषनाशित्वम्। रसायनत्वम्। बलकारित्वम्। चक्षुर्हितत्वम्। ग्राहित्वम्। लघुत्वञ्च। इति भावप्रकाशः ॥ श्वासकासधातुक्षयनाशित्वम्। स्वरकारित्वञ्च। सुराष्ट्रदेशजस्वर्णवर्णहरीतकी। सा स्नेहपाके प्रशस्ता जीर्णरोगनाशिनी। इति राजवल्लभः ॥ (अस्याः लक्षणं व्यवहारश्च यथा,—
"जीवन्ती स्वर्णवर्णिनी ॥"
"जीवन्ती सर्व्वरोगहृत् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) शमी। गुडूची। (पर्य्याया यथा,—
"गुडूची मधुपर्णी स्यादमृताऽमृतवल्लरी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) वन्दा। इति मेदिनी। ते, ११२ ॥ डोड़ी। इति राजनिर्घण्टः ॥ (जीव इति शाकविशेषः। शर्करावन्मधुरपुष्पा व्रततिः। अस्याः पर्य्याया यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

जीवन्मुक्तः, त्रि, (जीवन्नेव मुक्तः आत्मज्ञानेन मायात्वरहितः।) जीवद्दशायां मायाबन्धरहितः। (यथा, देवीभागवते। १। १९। ४८।
"जीवन्मुक्तः स राजर्षिर्ब्रह्मज्ञानमतिः शुचिः।
तथव्यक्तातिशान्तश्च योगी योगप्रियः सदा ॥")
तल्लक्षणं यथा। "स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्य्यसञ्चितकर्म्मसंशयविपर्य्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः।
'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥'
इत्यादिश्रुतेः।
अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण आन्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च तत्तत्पूर्ब्बपूर्ब्बवासनया क्रियमाणानि कर्म्माणि भुज्यमानानि ज्ञानाविरुद्धान्यारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति। यथा इन्द्रजालमिति ज्ञानवान् तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समना अमना इव सप्राणोऽप्राण इव इत्यादिश्रुतेः। उक्तञ्च।
'सुषुप्तवज्जाग्रति यो न पश्यति
द्वयञ्च पश्यन्नपि चाद्वयत्वतः।
तथापि कुर्व्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चयः ॥' इति।
अस्य ज्ञानात् पूर्ब्बं विद्यमानानामेवाहारविहारादीनां अनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति। शुभाशुभयोरौदासीन्यं वा। तदुक्तम्।
'बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि।
शुनां तत्त्वदृशाञ्चैव को भेदोऽशुचिभक्षणे ॥
ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः।' इति।
तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्त्तन्ते। तदुक्तम्।
'उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥' इति।
किं बहुना अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्य्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते। न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते विमुक्तश्च विमुच्यते। इत्येवमादिश्रुतेः।" इति वेदान्तसारः ॥

जीवपुत्त्रकः, पुं, (जीवः प्राणान् पुत्त्र इव। पुत्त्रवद्धर्षजनकत्वात् तथात्वम्। इवार्थे कन्।) इङ्गुदीवृक्षः। इति शब्दरत्नावली ॥ वृक्षविशेषः। इत्यमरटीकायां रमानाथः ॥ जीयापुता इति भाषा ॥

जीवपुष्पा, स्त्री, (जीवयतीति। जीव + णिच् + अच्। जीवं प्राणदं पुष्पमस्याः।) बृहज्जीवन्ती। इति राजनिर्घण्टः ॥

जीवप्रिया, स्त्री, (जीवानां प्राणिनां प्रिया हितकारित्वात्।) हरीतकी। इति राजनिर्घण्टः ॥

जीवभद्रा, स्त्री, (जीवानां प्राणिनां भद्रं मङ्गलं यस्याः।) जीवन्तीलता। ऋद्धिनामौषधम्। इति राजनिर्घण्टः ॥

जीवमन्दिरं, क्ली, (जीवस्य आत्मनो मन्दिरं गृहमिव।) शरीरम्। इति शब्दचन्द्रिका ॥

जीवला, स्त्री, (जीवं उदरस्थकृमिं लाति गृह्णाति नाशयतीति। ला + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) सैंहली। इति राजनिर्घण्टः ॥

जीववल्ली, स्त्री, (जीवयतीति जीवा प्राणदात्री। सा चासौ वल्ली चेति।) क्षीरकाकोली। इति राजनिर्घण्टः ॥